# Shri Chakrapanistotram

# શ્રીચક્રપાણિસ્તોત્રમ્

## Document Information

Text title : chakrapANistotram

File name : chakrapANistotram.itx

Category : vishhnu, vishnu

Location : doc_vishhnu

Proofread by : PSA Easwaran psawaswaran

Description/comments : Edited by S. V. Radhakrishna Shastriji

Acknowledge-Permission: Mahaperiaval Trust

Latest update : May 13, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# શ્રીચક્રપાણિસ્તોત્રમ્

સૂર્યકૃતં
(કુમ્ભકોણે સુદર્શન-નરસિંહ-ઘટિત ચક્રપાણિમૂર્તેઃ સ્તોત્રમ્ ।)

દેવદેવ જગન્નાથ નમસ્તે ભક્તવત્સલ ।
પ્રપન્નં પાહિ માં વિષ્ણો કૃપયા પુરુષોત્તમ ॥ ૧॥

અપરાધં ક્ષમસ્વાદ્ય મયાઽજ્ઞાનકૃતં પ્રભો ।
ત્વાં વિના શરણં નાસ્તિ ત્વમેવ શરણં મમ ॥ ૨॥

ચક્રામ્બુજે સમાસીનં ચક્રાદ્યાયુધભૂષણમ્ ।
ચક્રમન્ત્રાધિદેવેશં ચક્રરાજમહં ભજે ॥ ૩॥

સર્વાવયવસમ્પૂર્ણમષ્ટબાહું ત્રિલોચનમ્ ।
દંષ્ટ્રાકરાલવદનં ભયસ્યાપિ ભયઙ્કરમ્ ॥ ૪॥

ઉગ્રપિઙ્ગલકેશાઢ્યં જ્વાલામાલાપરિષ્કૃતમ્ ।
અપ્રદૃશ્યમનિર્દેશ્યં બ્રહ્માણ્ડવ્યાપ્તવિગ્રહમ્ ॥ ૫॥

અષ્ટાયુધપરીવારં અષ્ટશક્તિસમન્વિતમ્ ।
અષ્ટારં ચક્રમત્યુગ્રં મુસલં ચાઙ્કુશં તથા ॥ ૬॥

પદ્મં દક્ષિણપાર્શ્વે તુ ચતુર્ભિર્બાહુભિર્વૃતમ્ ।
વામતઃ શઙ્ખસશરચાપપાશગદાધરમ્ ॥ ૭॥

રક્તવસ્ત્રધરં દેવં રક્તમાલ્યોપાશોભિતમ્ ।
રક્તચન્દનલિપ્તાઙ્ગં રત્નમાલાવિભૂષિતમ્ ॥ ૮॥

દિવ્યરત્નવિચિત્રેણ મકુટેન વિરાજિતમ્ ।
દુષ્ટનિગ્રહકર્તારં ભક્તાનુગ્રહરૂપિણમ્ ।
સુદર્શનાભિધાનં ત્વામાત્મનોઽભિમુખં ભજે ॥ ૯॥

અવ્યાદ્ભાસ્કરસપ્રભાભિરખિલાભાભિર્દિશો ભાસયન્

ભીમાક્ષસ્ફુરદટ્ટહાસવિલસદ્દંષ્ટ્રઃ પ્રદીપ્તાનનઃ ।
દોર્ભિશ્ચક્રદરૌ ગદાબ્જમુસલાન્ શાર્ઙ્ગં ચ પાશાઙ્કુશૌ
બિભ્રત્પિઙ્ગશિરોરુહોઽતિધવલશ્ચક્રાભિધાનો હરિઃ ॥ ૧૦॥

મધ્યાહ્નસૂર્યપ્રતિમપ્રકાશં પિશઙ્ગકેશં સ્ફુરદટ્ટહાસમ્ ।
ત્રિરૂપદીપ્તામ્બરમુગ્રમીડે ચક્રસ્થિતં ચક્રિણમષ્ટબાહુમ્ ॥ ૧૧॥

કલ્પાન્તાર્કપ્રકાશં ત્રિભુવનમખિલં તેજસા પૂરયન્તં
રક્તાક્ષં પિઙ્ગકેશં રિપુકુલદહનં ભીમદંષ્ટ્રાટ્ટહાસમ્ ।
શઙ્ખં ચક્રં ગદાબ્જે પૃથુતરમુસલં ચાપપાશાઙ્કુશાદીન્
બિભ્રાણં દોર્ભિરીડ્યં મનસિ મુરરિપું ભાવયે ચક્રપાણિમ્ ॥ ૧૨॥

ત્રિણેત્રં ચતુશ્ચક્રસંશોભિહસ્તં સ્થિતં તચ્ચ પઙ્કેરુહે યોગપીઠે ।
મહોગ્રાકૃતિં કાલવિદ્યુત્સકાશં નૃસિંહં ભજે ચક્રપશ્ચાત્સુસંસ્થમ્ ॥ ૧૩॥

ઇતિ સૂર્યકૃતં ચક્રપાણિસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

*Shri Chakrapanistotram*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*